


बालवाटिका

सम्पादकः - डा० विश्वासः

उत्तरप्रदेशसंस्कृतसंस्थानम्

लखनऊ

बालवाटिका

(शिशुगीतानां विनोदकणिकानां च सङ्ग्रहः)

सम्पादकः

डा॰ विश्वासः

उत्तरप्रदेशसंस्कृतसंस्थानम्

लखनऊ

प्रकाशक :
डॉ. सच्चिदानन्द पाठक
निदेशक,
उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

प्राप्ति स्थान :
विक्रय विभाग
उत्तर प्रदेश संस्कृत संस्थान
नया हैदराबाद, लखनऊ–२२६ ००७
फोन : ७८०२५१

प्रथम संस्करण :
वि. सं. २०५८, (२००१ ई.)

प्रतियाँ : ११००

मूल्य : रु. ३०/– (तीस रुपये)

अक्षरसंयोजनम्–
'संस्कृतभारती', बेङ्गलूरु

मुद्रक : **शिवम् आर्ट्स** निशातगंज, लखनऊ–२२६ ००७

पुरोवाक्

कविता नित्यनूतनमयी चमत्कारोत्पादिनी तथा च सद्यः प्रभावोत्पादिका भवति। बालानां कृते विविधभाषासु गीतपरम्परायाः प्रथा दृश्यते। इदानीं शिशुकक्षासु प्रादेशिकभाषोपनिबद्धाः कविताः प्रचलिताः सन्ति। संस्कृतसाहित्ये बालकवितायाः पर्याप्तभण्डारो न दृश्यते। पञ्चतन्त्रस्य कथानकेन एकत्र सूचितं ''कलासीमा–काव्यम्'' अर्थात् कविताकलायाः कापि सीमा न भवति। कवितायाः माध्यमेन सहजतया भाषाविकासो जायते। तत्र व्याकरणशास्त्रस्य ज्ञानं विनैव प्रयोगाः ज्ञायन्ते, तथा च छन्दोलक्षणं, शब्दज्ञानं च अनायासेन कण्ठगतं भवति। बाल्यकाले कण्ठस्थीकृतान् काव्यश्लोकान् बालकाः प्रायः नैव विस्मरन्ति।

केन्द्रशासनस्य साहाय्येन बालकवितेयं प्रकाशिता विद्यते। अस्य सम्पादकाः संसकृतजगति सुविख्याताः, संस्कृतव्रतधारिणो विद्वांसः डॉ. विश्वासमहोदयाः सन्ति। एते कर्णाटकराज्यस्य बेंगलूरू नगरे निवसन्ति। संस्कृतार्थमेव विदेशेषु नैकबारं यात्रां कृतवन्तः। बहूनां ग्रन्थानां लेखनं, पत्रपत्रिकादीनां सम्पादनं प्रकाशनञ्च एभिः दशवर्षेभ्यः क्रियते। बालवाटिकेयं बालानां बुद्धिविकासाय सुजनानाञ्च परितोषाय भविष्यतीति मे दृढो विश्वासः। अस्य प्रकाशनस्य कृते उ.प्र. संस्कृतसंस्थानस्य निदेशकाः डॉ. सच्चिदानन्दपाठकमहोदयाः तथान्ये च तत्रस्थाः सहयोगिनः धन्यवादार्हाः सन्ति।

सं. २०५८, संस्कृतदिवसः
४ अगस्त, २००१

नागेन्द्रपाण्डेयः
अध्यक्षः
उ. प्र. संस्कृतसंस्थानम्

सम्पादकीयम्

पद्यसाहित्यं संस्कृते अत्यधिकम् इति सर्वेऽपि जानन्ति एव । 'गद्यं कवीनां निकषं वदन्ति' इति वदन्तः बहवः संस्कृतकवयः पद्यरचने एव प्रवृत्ताः अभवन् । तथापि शिशूनां बालानां कृते च उपयुक्तं साहित्यं तु संस्कृते विरलम् इत्येतदपि सत्यमेव । आधुनिकसंस्कृत-साहित्यनिर्माणे बद्धादरेण सम्भाषणसन्देशेन गतेभ्यः केभ्यश्चित् वर्षेभ्यः बहूनां लेखकानां द्वारा एतादृश-साहित्यस्य निर्माणाय कश्चन प्रयासः कृतः । तैः लिखितानि तादृशानि शिशुगीतानि विनोदकणिकाश्च सम्भाषणसन्देशे तदा तदा प्रकाशिताः । एवं प्रकाशितानां शिशुगीतानां विनोदकणिकानां च कश्चन सङ्ग्रहः करणीयः इति विचारः आसीदेव । अवसरेऽस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानस्य अध्यक्षेण डा॰ नागेन्द्रपाण्डेयमहोदयेन संस्थानपक्षतः तस्य प्रकाशनाय उत्साहः दर्शितः । तस्य फलस्वरूपेण एव पुस्तकमिदम् इदनीं प्राकाश्यं नीयमानम् अस्ति । एतदर्थं संस्थानध्यक्षाः अन्ये च सदस्याः कृतज्ञताम् अर्हन्ति ।

अत्र येषां गीतानि सङ्कलितानि येषाञ्च विनोदकणिकाः सङ्गृहीताः ते सर्वेऽपि कृतज्ञतापूर्वकं स्मर्यन्ते । सुन्दरचित्राणां निमित्तं कलाकारौ अरसुवर्यः सतीशश्च, अक्षरसंयोजननिमित्तं संस्कृतभारत्याः सङ्गणकविभागस्य कार्यकर्त्र्यश्च अभिनन्द्यन्ते ।

सर्वेऽपि शिशवः बालाः किशोराश्च पुस्तकस्य अस्य प्रयोजनं प्राप्नुवन्तु इति आशस्यते ।

वृष सं।। ज्येष्ठशुद्ध-चतुर्दशी — *डा॰ विश्वासः*

५.६.२००१ — *सम्पादकः*

शिशुगीतानि



१. नमामि गणपम्



नमामि गणपं, नमामि शुभदं
नमामि गजवदनम् ।
नमामि विघ्नेश्वरचरणाब्जं
नमामि परमेश्वरतनयम् ।।

उमासुतं जठरे भुजगं
धारयन्तमनिशं भजे ।
पाशधारिणं पापहारिणम्
अभयदायकं वन्दे ।।१।।

अङ्कुशे विघ्नम् अपसार्य
पालय भक्तान् अनवरतम् ।
वरदकरेण वरं प्रदाय
वारय दुःखं निरन्तरम् ।।२।।

मधुरं मोदकमतुलं खादसि
मूषकेण त्वं मन्दं चलसि ।
पतेयमितीक्षुदण्डं श्रयसि
भिन्द्यादुदरमित्युरगं धरसि ।।३।।

– गुण्डमि गणपय्य होळ्ळः

२. शारदे नृत्यतु मम वदने



शारदे, गानविशारदे !
विलसतु भवती मानससदने ।
संस्कृतभाषाभूषितवेषा
नृत्यतु नित्यं मम वदने ।।

ऋषिमुनिगदितानि वेदपुराणानि
दार्शनिकानां विविधमतानि ।
कविवररचितानि काव्यनाट्यादीनि
भवन्तु भारति भवदाभरणानि ।।

वीणानिनाद इव नादमयी वाणी
प्रभवतु कण्ठे भवतीदयया ।
जगदखिलं नयतु नादविलीनं
शान्तिमयं भवतु मनुकुलहृदयम् ।।

– गुण्डमि गणपय्य होळ्ळः

३. बालो रोदिति



काचिन्माता शिशुमुन्नीय
सायं भक्ष्यं भोजयति ।
शिशुरपि भक्ष्यं दूरीकुर्वन्
चित्रैः प्रश्नैः पीडयति ।

बालो रोदिति हे अम्ब !
आनय त्वम् इह शशिबिम्बम् ।
निधाय मामककरमध्ये
नन्दामीन्दोः सान्निध्ये ।।१।।

चरति विहायसि मेघः कुतः
कस्मात्तम् इह नानयसि ?
श्रान्तौ सत्यां घर्मे अहनि
तदुपरि स्वापं करवाणि ।।२।।

– विश्वासः

४. एकं द्वे त्रीणि...

१

२

३

एकं द्वे त्रीणि
आगच्छन्ति मित्राणि ।
क्रीडितुमत्र क्रीडाङ्गणे
एकत्र मिलन्ति सर्वाणि ।। १ ।।

चत्वारि पञ्च षट् सप्त
क्रीडनेन बहु सन्तृप्ताः ।
सर्वे बाला आयासेन
सूर्यातपेन च सन्तप्ताः ।। २ ।।

अष्ट नव दश
सर्वान् गणयति नरेशः ।
धावन्ति बाला स्वगृहं गन्तुं
तान् अनुधावति लोकेशः ।। ३ ।।

– गुण्डमि गणपय्य होळ्ळः

५. चन्दिरमानय मातः

मातः चन्दिर एकाकी
कस्माद् गगने सञ्चरति ?
मातरं पितरं गृहं विहाय
रात्रौ सततं सञ्चरति ?

वायुः वेगेन तं नयति
सूर्यः किरणैस्तापयति ।
मेघो जलेन आर्द्रयति
न कोऽपि तं परिपालयति ।।

अम्ब चन्दिरमानयतु
अस्मद्गेहे स्थापयतु ।
तेन सहाहं क्रीडामि
खादामि पिबामि नन्दामि ।।

– गुण्डमि गणपय्य होळ्ळः

६. लज्जावति अयि ! लज्जावति !



लज्जावति अयि ! लज्जावति !
आगते मयि कुतो लज्जसे ?

कण्टकाञ्चितं तव शरीरकम्
स्पर्शनेन तु कुसुमकोमलम् ।
प्रातरेव त्वं प्रबुद्धा कथम् ?
दिने कदापि च न निद्रासि किम् ? ।।१।।


पापकर्मिणः खल्वमी जनाः
तथापि तैः कथं नैव लज्ज्यते ?
इति हि त्वं खलु विस्मिता ननु ?
मास्तु विस्मयो ईदृशा वयम् ।। २ ।।

मा स्पृशन्तु मां मनुजपशवः
स्पर्शनेन मा मलिनयन्तु भोः ।
एवमसकृत् चिन्तनेन किम्
आगतेषु मानवेषु त्वं जुगुप्ससे ? ।। ३ ।।

वसनविरहिता हसनपरिणता
वचनरहितबोधनं तव विशेषता ।
पापभीरुता झटिति स्वस्थता
भवतु मयि सखि त्वयि च तद्यथा ।। ४ ।।

– विश्वासः

७. दूरदर्शने किमिदं विश्वदर्शनम् ?



तातास्माकं दूरदर्शनं
सकलजनानां हर्षवर्धनम्
पश्यतु लघुगात्रम्
किन्तु बहुविधं वैरुध्यम् ।
भूयो भूयो दृष्टं
किमिति न भाति; विचित्रम् ।। १ ।।

श्रीरामो दशकण्ठच्छेदी
भीमो दुर्योधनवैरी ।
श्रीकृष्णः कंसं निहन्ति
ते कथमत्र सहैव वसन्ति ? ।। २ ।।

जायतेऽत्र जलपातः
भूकम्पनादिरुत्पातः ।
अग्नेर्दाहो नदीप्रवाहो
दूरदर्शनस्य तु न च्युतिः ।। ३ ।।

योधगणानां शौर्यं
महात्मनां च चरितम् ।
दीनानां हीनावस्था
कस्मादमुत्र समं भवन्ति ? ।। ४ ।।

– *गुण्डमि गणपय्य होळ्ळः*

८. कोकिल कूजतु पञ्चमरागम्

कोकिल माकन्दतरौ
कूजतु पञ्चमरागम् ।
सन्निहितः खलु वसन्तमासः
वहति किमत्र विरागम्


चूतवने विकसन्ति
सुमानि सुमेषु स्यन्दति मकरन्दम् ।
मकरन्देन मत्तो भवाँस्तु
स्वरसौष्ठवं प्रकाशयतु ।। १ ।।

नो चेत् काककदम्बः
रटति हि कर्णकठोरम् ।
कः स्याद् भवतोर्वर्णभेदः
स्वर एव भेदं प्रकटयति ।। २ ।।

सन्तः सन्ति भवादृशा
एकान्ते ते निवसन्ति ।
खला लसन्ति तत्समवेशा
न जनास्तयोस्तु भेदं जानन्ति ।। ३ ।।

– गुण्डमि गणपय्य होळ्ळः

९. ओतो ओतो !




ओतो ओतो ! मोहनकेतो !
क्व नु खलु यातोऽसि ?
आहूतोऽसि, नासि, कुतोऽसि ?
आखुं गृह्णासि ?

कोष्णं क्षीरं तवोपनीतम्
आगच्छागच्छ ।
आगन्तुं ते नेच्छति चित्तं
वाञ्छसि किं ब्रूहि ?

गेहे गेहे दधिनवनीते
खादसि चौर्येण ।
पायं पायं पयसः पूरं
पूरितमुदरं ते ।।

– के. एस्. भास्करभट्टः

१०. स्वरमाला



अ अम्बा अस्माकम्
आ आदरपात्रम्
इ इहलोके सा तु
ई ईश्वरीव पूज्या ।।


उ उदारचरितम्
ऊ ऊनभावरहितम्
ऋ ऋजुना सहजीवनम्
अत्रास्माकं भवतु ।।

ए एकसूत्रबद्धता
ऐ ऐक्यमस्तु सकलानाम् ।
ओ ओजसा च जनता
औ औन्नत्यं प्राप्नोतु ।।

अ आ इई उऊ ऋॠ
ऌ ॡ अक्षरमालायाम् ।
ए ऐ ओ औ अं अः
एतैः सह स्वरमाला ।।

– गुण्डमि गणपय्यहोळ्ळः

११. नृत्यति वर्षाराज्ञी



'रिम्– झिम्' 'रिम्-झिम्' वर्षन्ति नु वर्षाः
नृत्यत्यपि वर्षाराज्ञी ।
अवलोक्य यस्याः हृद्यां नृत्यच्छटां
हसति माता धरणी ।।

'चक्-चक्' 'चक्-चक्' लसति नु विद्युत्
कृष्णे गगनफलके ।
मुहुर्मुहुरहो ! गर्जति तर्जति
स्तनितं हि मेघलोके ।।


'सी-सी' 'सी-सी' प्रवहंश्च वायुः
गायति मधुरस्वरैः ।
सन्ति दोलायिताः सपादपाः लताः
सखिभिः शाखाभिः पत्रैः ।।

'वटर्-वटर्' गायन्ति च भेकाः
दृष्ट्वा घोरवर्षाकालम् ।
पश्य धरा माता राजते कीदृशी
परिधायहरिद्वस्त्रम् ।।

एहि एहि कुनि ! एहि एहि मुनि !
एहि एहि खेलिष्यामः ।
कागदनावं निर्माय धारासु
वर्षासु वाहयिष्यामः ।।

- डा॰ बनमाली बिश्वालः

१२. चलति बाष्पयानं झटिति



चक भक चक भक
चलति बाष्पयानम् ।
झटिति रचयति
पेटीरूपां मालाम् ।।

गिरिमारोहति गम्भीरं
नदीं सलीलं तरति ।
गुहां प्रविशति गम्भीरं
दिवाऽपि जनयति रात्रिभ्रान्तिम् ।।१।।


नानाभाषाभाषिणः
विविधमतावलम्बिनः ।
सकला मिलन्ति समभावेन
राष्ट्रबन्धुतां कल्पयतीदम् ।।२।।

नादसन्ततिं तनोति गुर्वीं
जनं बोधयति स्वागतम् ।
निजवदनस्य दर्शनेन
भृशं हर्षयति यात्रिगणम् ।।३।।

शिलामयानि जलधाराभिः
शोभन्ते गिरिशिखराणि ।
सस्यश्यामलगात्री
परितो राजति वनराजिः ।।४।।

- गुण्डमि गणपय्य होळ्ळः

१३. अस्मद्गृहस्य बिडालः



अस्मद्गृहे निवसत्येकः
स्थूलो बिडालः ।
दिवा स मौनी
कोणे तिष्ठति
नेत्रे सम्मील्य ।।


रात्रौ मन्दं सञ्चरति
मूषकं यदा पश्यति ।
क्रूरः सन्नुत्पतति
तदा स किल शार्दूलः ।।

माता यद्यन्यत्र गता
विशति स पाकगृहम् ।
क्षीरं पीत्वा दधि नवनीतं
सर्वं खादति निःशङ्कम् ।।

मार्जारो मम मित्रं
क्रीडामि तेन च साकम् ।
खाद्यं दत्त्वा शय्यां कृत्वा
पालयामि तं प्रीत्या ।।

– गुण्डमि गणपय्य होळळः

१४. कण्टकमयं पनसशरीरम्



गोणीं हस्ते कृत्वा विपणिं
गन्तु पनसो निश्चितवान् ।
गोणीपूर्णं कण्टकजालं
क्रीत्वा त्वरया निर्गतवान् ।।

मार्गे गच्छन् गर्ते पनसः
स्खलिपदो हा पतितोऽभूत् ।
व्रणितः क्षतितः कण्टजालैः
आवृतकायः पनसोऽभूत् ।।

धूनन-कूर्दन-कम्पन-चलनैः
कण्टकयुतता नापगता ।
तस्माद्दिनतः कण्टकपूर्णं
पनसशरीरं सञ्जातम् ।।

- कल्लसि कृष्णम् कुट्टी

१५. सर्वसेव्या गीर्वाणवाणी

वयं भारतीयाः सुधर्मे विधेयाः
वयं वेदवेद्यात्मविद्यासहायाः ।
वयं शान्तिदूताश्च 'सर्वंसहायाः'
सदा सर्वसेव्या तु गीर्वाणवाणी ।।१।।

ऋते संस्कृतात् संस्कृतेः संस्थितिः क्व ?
ऋते संस्कृतादैकमत्यं कुतो वा ।
ऋते संस्कृताद्देशवृद्धिः कथं स्या-
दतः सर्वसेव्या तु गीर्वाणवाणी ।।२।।

विना जातिभेदं विना व्यक्तिभेदं
विना वर्णभेदं विना राष्ट्रभेदम् ।
लसद्भारतीयावनी दीपरूपा
सदा सर्वसेव्या तु गीर्वाणवाणी ।।३।।

सदा पठ्यमाना मुदा पाठ्यमाना
चिरं लिख्यमाना परं लेख्यमाना ।
जनैः स्तूयमाना समुद्गीयमाना
क्षितौ सर्वसेव्या तु गीर्वाणवाणी ।।४।।

सुधीभिः सुधावन्मुदास्वाद्यमाना
धरायां च भाषासु भूषायमाना ।
पुनाना जनान् पुण्यगङ्गायमाना
सदा सर्वसेव्या तु गीर्वाणवाणी ।।५।।

- जि. एम्. रामशर्मा

१६. संस्कृतदीपं ज्वालयामः



संस्कृतदीपं ज्वालयामः
भारतीयनिर्मलहृदये ।
साधयामः सकलजनानां,
विश्वबन्धुतामिह भुवने ।।

असतो मा सद्गमय सदेति
सद्भावं परिपालयामः ।
तमसो मा ज्योतिर्गमयेति
ज्योतीरूपं प्रार्थयामहे ।
मृत्योर्मा अमृतं गमयाशु
हृदयात् दुर्बलतां परिहाय ।
सत्त्वमवाप्य मृत्युं जित्वा
ज्योतिर्मयजीवनमाप्नुमः ।।१।।

सह नाववतु सह नौ भुनक्तु
सहजीवनमिह पाठयामः ।
सह वीर्यं करवावहै
स्थैर्यं सह धैर्यं सम्पाद्य ।
तेजस्विनावधीतमस्तु
विनयेन समार्जितमेतत्तु
मा विद्विषावहै, सोदरताम्
अधिगम्य सदा जीवामः ।।२।।

– गुण्डमि गणपय्य होळ्ळः

१७. कदापि वाणी न सा मृता

संस्कृतेन भाषणं
संस्कृताय जीवनम् ।
तत्त्वमेतद् आचरतु
परिजनमपि प्रेरयतु ॥

सनातनी सा भाषा
सुरझरीव निर्दोषा ।
त्रय्यागमविख्याता
ऋषिजनसमुपासिता ॥

पाणिनीयपदघोषा
सुमनोहरसुरभाषा
काव्यशास्त्रविराजिता
विनुतविशदसच्चरिता ॥

- के. वि. शास्त्री

१८. संस्कृतभक्ताः



वयं बालकाः संस्कृतभक्ताः
वयं बालिकाः संस्कृतभक्ताः ।
वयं हि सर्वे संस्कृतासक्ताः
जनभाषां संस्कृतं कर्तुं शक्ताः ।।

वयं सुधीराः वयं सुवीराः
हृष्टमानसाः कृतनिर्धाराः।
भूरि वदामो भूरि लिखामो
भवितास्मः संस्कृतहिते नियुक्ताः ।।

जाति-धर्म-मत-भेदं त्यक्त्वा
संस्कृतवर्षं पूज्यं मत्वा ।
संस्कृतभावं हृदये धृत्वा
संस्कृतसेवायामनुरक्ताः ।।

- मञ्जूषा

१९. कष्टम् - इष्टम्



कष्टं कष्टं बहु कष्टम्
प्रातः काले उत्थानम् ।
प्रश्नानां पुनरुत्तरकरणम्
पृष्ठे पुस्तकभारोद्वहनम्
कष्टं कष्टं बहु कष्टम् ।।


सायं प्रातः क्रीडाभ्यासः
गण्ये पण्ये मधुरग्रासः ।
कक्ष्यायां तु सदा परिहासः
इष्टम् इष्टं बहु इष्टम् ।।

पठनं पाठश्रवणं कष्टम्
लेखनमेव नितान्तं कष्टम् ।
अनुशासनमेव हि कष्टम्
कष्टं कष्टं बहु कष्टम् ॥

नवगीतानां गानम् इष्टम्
अहर्निशं चलचित्रम् इष्टम् ।
अतिसहकारि च मित्रम् इष्टम्
शिष्टं सर्वं बह कष्टम् ॥

– नी. ना. मध्यस्तः

२०. कोऽहम्



कोऽहं कोऽहं
कोऽहं कोऽहं
कोऽऽऽहम् ?

इक्षोर्दण्डं
शुण्डया झटिति
खण्डयामि कोऽहम् ?

स्नात्वा मृत्सां
शिरसि क्षिप्त्वा-
ऽऽनन्दितोऽस्मि कोऽहम् ?

पत्रं शष्पं
नवं किसलयं
भक्षयामि कोऽहम् ?

यूथे निवसन्
कलभैः क्रीडाम्
आचरामि कोऽहम् ?

सङ्घे वासः
क्षेमप्रद इति
घोषयामि कोऽहम् ?

कोऽहं कोऽहं
कोऽहं कोऽहं
कोऽऽऽहम् ?

- एस्. जगन्नाथः

२१. अहं काचन विहङ्गमिका

अहं काचन विहङ्गमिका ॥अहं ॥

विहायसि मम गतिररोध्या
विहारेऽस्मिन्नहमयोध्या
अहमजय्याऽस्मीतराभिः
विकृतरुतिभिः प्रगल्भाभिः
अक्षयाऽस्म्यहमबध्याऽहं
रज्जुभिः क्वाप्यबध्याऽहं
सर्वतन्त्रस्वतन्त्राऽहं
समसमाजसमुन्नताऽहम्. ॥अहं...॥

ललितकाश्मीराच्छसरसीषु
अमलमलयसुगन्धभूमिषु
गाङ्गयामुनसैकतेष्वथ
भव्यगोदावरीवीचिषु
उदकमण्डलनिर्झरालिषु
रमे पावनहिमशिखरिषु
द्वारकावृन्दावनपुरी-
काश्यवन्तीमणिपुरादिषु ॥अहं...॥

नन्दनारामोच्चशाखासु
अतुलमन्दनिकुञ्जाङ्गिषु
चैत्ररथशुभकाननानां
बाहुषु स्पृहया चरामि

सत्यलोके वरविकुण्ठे
रम्यकैलासाग्रभूमौ
सुधर्मायां संयमिन्याम्
अलकया सह वरुणपुर्याम्   ॥अहं...॥

वेदशास्त्रपुराणनिलये
काव्यनाटकजगत्यामपि
निखिलवाङ्मयमूलधामनि
अक्षरेऽखिलसरस्वत्याम्
जातिमतवर्गादिभेदो
नास्ति मम सत्यं ब्रवीमि
देशकालविरोधशून्या
अहं संस्कृतहंसिका
अहं संस्कृतिहंसिका
अहं भारतहंसिका   ॥अह...॥

– दोर्बलप्रभाकरशर्मा, कोव्वूरु

२२. वीर रे पुरश्चल



वीर रे पुरश्चल
धीर रे पुरश्चल ।
केतुरस्तु करतले
सङ्घदक्षताऽस्तु ते ।
पतत्वधो न हि ध्वजो
न कुण्ठितो गणो भवेत् ॥१॥

मनो दृढं त्वमाप्नुहि
भवतु सिंहगर्जनम् ।
त्वं बिभेहि जातु नो
पुरः प्रयाहि सर्वदा ॥२॥


विघ्नवर्षणं भवेत्
मेघगर्जनं भवेत् ।
वृष्टिरस्तु, वह्निरस्तु
मा भजेरधीरताम् ।।३।।

लोकमित्रताऽस्तु ते
सर्वजनहितं कुरु ।
नास्ति यत्र बन्धुता
तत्र याहि सत्वरम् ।।४।।

दिवाऽपि वा निशासु वा
सहानुगैर्विनाऽपि वा ।
सूर्यसदृशतेजसा
कार्यसिद्धये चल ।।४।।

– नरसिंह एम्. भट्ट, बेङ्गलूरु

२३. बालचन्दिर



बालचन्दिर लोकसुन्दर
एहि गगनविभूषण ।
एहि सत्वरम् एहि शशधर
एहि एहि मदन्तिकम् ।।


कुत्र गच्छसि कुत्र निवससि
ब्रूहि किं तव वाहनम् ?
चलसि नित्यं नियतगत्या
मासि किं तव वेतनम् ।।

लीयसे त्वं वर्धसे त्वं
हससि किं खलु कारणम् ?
निरवलम्बं सञ्चरन् अपि
पतसि न त्वं कथमिदम् ।।

कथमवाप्ता कान्तिरेषा
ह्लादिनी सा कौमुदी ?
लीयसे त्वं कुत्र दिवसे
रञ्जकं तव जीवनम् ।।

– जनार्दन हेगडे

२४. कः किं खादति ?



अश्वोऽत्ति चणकाभ्यूषं
लघुधान्यानि कुक्कुटः ।
मार्जारो मूषकान् अत्ति
मत्स्यान् अश्नाति वै बकः ।।

वानरो कदलीम् अत्ति
शुकः खादति दाडिमम् ।
रोचते बालकायाम्रं
तृणं खादति गोवृषः ।।

- चेतना मुळे

२५. सुविशाला विद्याशाला



सुविशालेयं विद्याशाला ।
येऽत्र पठन्ति सर्वे सरलाः ।।१।।

भद्रा मधुरा भगिनी शीला ।
करोति गानं ललूललललूला ।।२।।

आयातीयं काञ्चनबाला
न कदापीयं पुष्टा चपला ।।३।।

हसति सर्वदा भगिनी माला ।
मुखे सुमत्याः सदैव लालाः ।।४।।

मदनभ्राता पठति नवम्याम् ।
कथां च ब्रूते सुरससुरम्याम् ।।५।।

क्रन्दति सततं कनकमञ्जरी ।
मा कुरु नादं वदति झर्झरी ।।६।।

खेलं खेलत कुरुत हे गानम् ।
चलत चलत पश्यामेद्यानम् ।।७।।

उद्यानेऽस्मिन् बहु कुसुमानि ।
पश्यत मा मा जिघ्रत तानि ।।८।।

वायुर्मन्दं प्रवहति चात्र ।
सततं वारि वर्षति तत्र ।।९।।

पादपमूले भवति च्छाया ।
तत्र च शेते भगिनी माया ।।१०।।

खेलत खेलत मा मा तत्र ।
धावत धावत मा सर्वत्र ।।११।।

कोकिलकूजं मधुरं मधुरम् ।
शृणुत शृणुत मा गच्छत दूरम् ।।१२।।

- सम्पदानन्दमिश्रः

२६. पारी महामारी



राजण्णस्य पार्श्वगृहे
पारीनाम्नी एका बाला ।
सा गजगात्री महास्थूला
भावयति स्वं सर्वसमर्थाम् ।।१।।

शालां सा तु गच्छन्ती
बालान् सर्वान् ताडयति ।
प्रीतिं सा तु न हि जानाति
नीतिं कदापि नाकर्णयति ।।२।।

गच्छन्ती सा जातु तटाकम्
अपत्तत्र स्खलनात् भूमौ ।
दन्ताः भग्नाः स्नुतं च रक्तं
हन्त ! हा हन्त ! दयनीया सा ।।३।।

वैद्यः तत्र आगतवान्
मञ्चे तां च स्थापितवान् ।
पार्या दुःखं महदनुभूतम्
नष्टो नष्टः तदहङ्कारः ।।४।।

- एस्. हेमलता

विनोदकणिकाः



यदि तदपि मया चिन्त्यम्...



किशोरः - उद्योगिरूपेण कश्चन जनः आवश्यकः । सः मम सर्वाः चिन्ताः कर्तुं शक्नुयात् । अहं तस्मै उचितं वेतनम् अपि दास्यामि ।

गोविन्दः - अहम् उद्योगान्वेषणं कुर्वन् अस्मि । कृपया मह्यं तम् उद्योगं ददातु ।

किशोरः - अस्तु ।

गोविन्दः - तन्निमित्तं किं वेतनं ददाति ?

किशोरः - पञ्च सहस्रं रूप्यकाणि ।

गोविन्दः - पञ्च सहस्रम् ! तावता धनेन अहं न केवलं भवतः, भवतः वंशजानाम् अपि चिन्तां कर्तुं शक्नोमि । भवतु । इदानीं भवतः आयः कः अस्ति ?

किशोरः - त्रिसहस्त्रं रूप्यकाणि ।

गोविन्दः - त्रिसहस्त्रं रूप्यकाणि ! तर्हि भवान् मह्यं कथं पञ्च सहस्त्रं रूप्यकाणि ददाति ?

किशोरः - यदि तद्विषये अपि मया एव चिन्ता करणीया तर्हि भवान् कथम् एतम् उद्योगं प्राप्स्यति..?

※ ※ ※

इदानीम् अनाथः...

पतिः - (पत्नीम् उद्दिश्य) आवयोः विवाहानन्तरं प्रथमवर्षे भवती चन्द्रमुखी आसीत् । द्वितीयवर्षे सूर्यमुखी आसीत् । ततःपरं सर्वदा ज्वालामुखी एव दृश्यते ।

पत्नी - आम् । प्रथमे वर्षे भवान् मम प्रणनाथः आसीत् । द्वितीयवर्षे तु केवलं नाथः आसीत् । इदानीं तु अनाथः एव अस्ति !

- (सं) शिशिरराज 'कमल'

※ ※ ※

पितृगुणः

एकः चोरः आम्रवृक्षम् आरुह्य आम्रफलानि त्रोटयन् आसीत् । तदानीम् उद्यानपालकः आगतः । सः तं चोरं दृष्ट्वा आक्रोशेन गर्जितवान् - ''अये ! चौर्यं करोति ? लज्जा न भवति ? भवतः पिता कुत्र अस्ति ?''

चोरः - मम पिता अन्यस्मिन् वृक्षे अस्ति !

※ ※ ※

पतिव्रताभावना



(द्वे महिले परस्परं वार्तालापं कुरुतः ।)

प्रथमा - अधुना कथं स्त्रियः स्वपतीन् बहु निन्दन्ति । वस्तुतः एतत् उचितं न ।

द्वितीया - मां पश्यतु ! यद्यपि मम पतिः महामूर्खः, अलसः, वाचालः च अस्ति तथापि अहं तस्य निन्दां न करोमि ।

प्रथमा - सत्यमिदम् । अधुना पतिव्रता भावना एव नष्टा ।

* * *

विक्रीतं किम् ?

मित्रम् - मित्र ! अहं श्रुतवान् यद् भवान् एकं नूतनं पुस्तकं लिखित्वा मुद्रापितवान् इति ।

लेखकमित्रम् - आम् ! भवान् सत्यम् श्रुतवान् ।

मित्रम् - किञ्चित् अपि विक्रयणम् अभवत्, उत न ?

लेखकमित्रम् - आम् ! मम अङ्गुलीयकं, द्विचक्रिका मम पत्नाः कण्ठहारश्च विक्रीताः अभवन् !

* * *

साहाय्यं करोमि

पुरुषः – भोः मित्र ! यदि अद्य सन्ध्यापर्यन्तं दशसहस्त्र-रूप्यकाणि न उपलब्धानि भवन्ति तर्हि अहं विषभक्षणं कृत्वा प्राणत्यागं करोमि । मम प्रियमित्रम् अस्ति । भवान् मम साहाय्यम् अवश्यमेव करोति किल ?

मित्रम् – आम् ! भवतः कृते विषभक्षणार्थं रूप्यकाणि अवश्यमेव दास्यामि ।

※ ※ ※

अस्ति अभिज्ञानम्

एकः रक्तरञ्जितः बालकः गृहं प्रति आगतवान् । तं दृष्ट्वा बालकस्य माता आश्चर्यचकिता पृष्टवती – भोः ! किम् अभवत् ? भवतः सम्पूर्णं शरीरं रक्तरञ्जितं जातं, कथम् एतत् ?

बालकः – मातः ! एकेन बालकेन सह मम युद्धम् अभवत् ।

माता – भवान् तं बालकं जानाति किम् ? तस्य अभिज्ञानम् अस्ति किम् ?

बालकः – आम् ! अहं तं सम्यक् जानामि । मातः ! पश्यतु तस्य एकः कर्णः मम कोषे अस्ति ।

※ ※ ※

कारणं कोलाहलस्य

एकदा मध्यरात्रे पतिपत्न्योः वाग्युद्धं प्रवृत्तम् । वाग्युद्धस्य ध्वनिः शनैः शनैः उच्चैः अभवत् । प्रतिवेशिनः सर्वे जागरिताः । प्रतिवेशिनः पृष्टवन्तः – किमर्थं मध्यरात्रे कोलाहलः ?

पत्नी – कोलाहलस्य कारणमेतद् – अहम् इच्छामि यत् मम पुत्रः वैद्यकीयं पठित्वा वैद्यः भवतु । यतः अहं सर्वदा रुग्णा भवामि ।

पतिः - परन्तु मम इच्छा अस्ति यत् मम पुत्रः विधिस्नातकं कृत्वा अधिवक्ता भवतु ।

प्रतिवेशी - पुत्रस्य का इच्छा अस्ति ?

द्वावपि - पुत्रः इदानीं न प्रसूतः!

व्याख्यानं श्रोतुम्...

कश्चन मद्यपः रात्रौ द्वादशवादने गच्छन् आसीत् । तम् आरक्षकः गृहीतवान् ।



आरक्षकः - मध्यरात्रे कुत्र गच्छन् अस्ति ?

मद्यपः - व्याख्यानम् श्रोतुं गच्छन् अस्मि श्रीमन् !

आरक्षकः - रात्रौ द्वादशवादने कुत्र व्याख्यानं भवति ?

मद्यपः - श्रीमन् ! व्याख्यानं मध्यरात्रे एव भवति । तदपि मम गृहे एव ।


आरक्षकः - कः करोति व्याख्यानम् ?

मद्यपः - मम दुष्टात्मा पत्नी !

- विजयकुमारः

अहम् अस्मि रावणः .....

एकेन मोटर्सैकल्-यानेन जनत्रयं गच्छत् आसीत् । मार्गे आरक्षकः कश्चन यानं स्थगितवान् । पृष्टवान् च – ''किमर्थं त्रयः भवन्तः एकं



यानम् आरुह्य गच्छन्तः नियमोल्लङ्घनं कुर्वन्तः सन्ति ? स्वनाम वदन्तु तावत् ?''

एकः – मम नाम रामः ।

आरक्षकः – (द्वितीयं पृच्छति) भवतः नाम किम् ?

द्वितीयः – मम नाम लक्ष्मणः ।

आरक्षकः – (तृतीयं पृच्छति) भवतः नाम किम् ?

तृतीयः – मम नाम भरतः ।

आरक्षकः – तर्हि भवतां सर्वेषां पितुः नाम दशरथः अस्ति, एवं ननु ?

प्रथमः – आम्, भवान् कथं जानाति ?

आरक्षकः – हाँ..ऽऽऽ! मम नाम रावणः अस्ति । अहं भवतां समग्रं परिवारं सम्यक् जानामि । चलन्तु लङ्कां प्रति .....।

जीवनं सफलं भविष्यति .....

भिक्षुकः - (पथिकं वदति) पञ्च रूप्यकाणि देहि भ्रातः ।

पथिकः - नास्ति ।

भिक्षुकः - भवतः जीवनं सफलं भविष्यति ! चत्वारि रूप्यकाणि ददातु !

पथिकः - नास्ति भोः ।

भिक्षुकः - तर्हि एकं रूप्यकं ददातु !

पथिकः - मम पार्श्वे एकं नाणकम् अपि नास्ति ।

भिक्षुकः - तर्हि भवान् मम बन्धुः एव । एकं कार्यं करोतु भवान् । मम दण्डं स्वीकृत्य अग्रे अग्रे चलतु । भवतः जीवनं निश्चयेन सफलं भविष्यति ।.....

- *विजय कुमारः*

कः व्याधिः ?

एकः चिकित्सार्थं चिकित्सालयं गतवान् । वैद्यं दृष्ट्वा सः उक्तवान् - वैद्यवर्य ! कश्चन व्याधिः मां बाधते ।

कः सः व्याधिः ? - वैद्यः पृष्टवान् ।

मम स्मरणशक्तिः नितरां क्षीणा अस्ति । अहं किमपि स्मर्तुम् एव न शक्नोमि ।

कतिभ्यः दिनेभ्यः एषः व्याधिः भवन्तं बाधमानः अस्ति ?

रोगी पृष्टवान् - कः व्याधिः ?

न ते जनाः, अपि तु ...

विमानयानम् ऐदम्प्राथम्येन आरूढवती पत्नी पतिम् उक्तवती - अहो, आश्चर्यम् ! जनाः पिपीलिकाः इव दृश्यन्ते ।

तत् श्रुत्वा पतिः कोपेन उक्तवान् - अलं व्यर्थवार्तालापेन । विमानस्य उड्डयनम् इतोऽपि न आरब्धम् । भवत्या दृश्यमानाः तु वास्तविक-पिपीलिकाः एव ।

- *गोपालनारायणशर्मा*

ताम् एव पृच्छतु ...

पुस्तकं पठन् उपविष्टः पुत्रः पितरं पृष्टवान् – तात ! हिमालयः कुत्र अस्ति ?

पिता उक्तवान् – ''न जाने वत्स ! एतस्मिन् गृहे किं कुत्र भवति इति न ज्ञायते एव मया । भवतः माता एव सर्वाणि वस्तूनि यत्र कुत्रापि स्थापयति । अतः ताम् एव पृच्छतु .....!

– नम्रता टण्डन्

धने असति, चिन्ता किमर्थम् ?

गृहार्थम् आवश्यकानां वस्तूनां नाम लिखन् आसीत् पतिः । पत्नी वस्तूनां नामानि वदन्ती आसीत् । आवली सिद्धा । आवलीं सकृत् आद्यन्तं परिशील्य उक्तवान् पतिः – ''एतावन्ति वस्तूनि आनेतुं मम समीपे धनं सर्वथा नास्ति ।''

तत् श्रुत्वा पुरतः पठनार्थम् उपविष्टः पुत्रः उक्तवान् – ''तदर्थं चिन्ता किमर्थम् ? गृहे यानि वस्तूनि न सन्ति तेषाम् आवली खलु क्रियते ? अतः वस्तूनाम् आवल्यां तदपि योजयतु ।''

– गोपालनारायणशर्मा



अलं चिन्तया

ज्वरेण पीडितस्य रुग्णस्य पत्नी वैद्यसमीपं गत्वा उक्तवती – ''भवता दत्तस्य औषधस्य सेवनस्य अनन्तरम् अपि मम पत्युः शरीरात् स्वल्पोऽपि स्वेदः न निर्गतः ।''

तद वैद्यः उक्तवान् –'' अलं चिन्तया । अहं चिकित्सासम्बद्धं देयकं दास्यामि । तत् भवती तस्मै दर्शयतु । तत्र दर्शितस्य राशेः दर्शनात् तस्य शरीरे झटिति स्वेदः उत्पद्येत एव ।''

– स.त्र्य. रहातेकर

शुल्कम् अधिकम्

एकः चिकित्सकः व्याधिग्रस्तः जातः । सः अन्यस्मात् औषधम् आनीय सेवते स्म । एतत् दृष्ट्वा तदीयः पुत्रः पृष्टवान् –

''भोः तात ।भवान् तु स्वयं वैद्यः एव । एवं स्थिते किमर्थं वा आत्मनः चिकित्सा स्वयं न क्रियते ?'' इति ।

वैद्यः उक्तवान् –''मम चिकित्साशुल्कम् अधिकम् । अतः.....'' इति ।

– सुदर्शनकुमारः

अलं तावत्

कश्चन वणिक् कश्चन कृषिकः च तपश्चरणार्थम् अरण्यं गतवन्तौ । कठोरं तपः आचरितवन्तौ । तयोः तपसा सन्तुष्टः देवः प्रत्यक्षीभूय प्रथमं कृषिकं पृष्टवान् - ''भक्त ! किम् इच्छति भवान् ?'' इति ।

''देव ! मह्यम् ऐश्वर्यम् आवश्यकम् । प्रासादसदृशं भवनम् आवश्यकम् । कारयानानि आवश्यकानि । सकलसौभाग्यम् अपि आवश्यकम्'' – इति कृषिकः बहुधा अपेक्षां प्रकटितवान् ।

''तथास्तु'' इति वरेण कृषिकम् अनुगृह्य देवः वणिजः पुरतः स्थित्वा पृष्टवान् - ''भवान् किम् इच्छति ?'' इति ।

वणिक् उक्तवान् - ''देव ! मह्यं किमपि वस्तु न आवश्यकम् । भवता इदानीं यस्मै कृषिकाय वराः दत्ताः तस्य मम च दृढा मैत्री यथा चिरं भवेत् तथा अनुगृह्णातु । तावता अलम्'' इति ।

- *(सं) मकरन्दः*

तदर्थम्...

''किमर्थं सर्वेभ्यः ऋणं स्वीकरोति भवान् ?''

''सर्वेभ्यः ऋणं न स्वीकरणीयम् इति अपि चिन्तयामि । किन्तु किं करवाणि, कोऽपि एकः एव सर्वदा ऋणं न ददाति खलु मह्यम् !''

※ ※ ※

अविस्मृत्य क्रीताः

''धिक् भवतः विस्मरणशीलताम् ! अविस्मृत्य शाकाः आनेतव्याः इति सूचितवती आसम् । भवान् तु...''

''अये, मां विस्मरणशीलं मा भावयतु भवती । कार्यालयतः आगमनसमये मया शाकाः अविस्मृत्य क्रीताः एव ।''

''तर्हि ते कुत्र ?''

''लोकयाने ते परित्यक्ताः विस्मरणवशात् ।''

※ ※ ※

विहारस्तु निश्शुल्कः

उद्यानस्य द्वारे फलकम् आसीत् - ''उद्याने विहारः निश्शुल्कः'' इति। एतत् पठित्वा सन्तुष्टः कश्चन कृपणः उद्यानम् उपसर्प्य अन्तः गन्तुम् उद्युक्तः ।

तदा उद्यानपालकः तस्य प्रवेशं निवारयन् उक्तवान् - ''एकं रूप्यकं दातव्यं भवता प्रवेशार्थम्'' इति ।

''निश्शुल्कः विहारः इति खलु फलके लिखिथम् अस्ति ?'' इति उक्तवान् कृपणः ।

उद्यानपालकः शान्तस्वरेण एव उक्तवान् - ''अन्तः विहारः निश्शुल्कः एव । किन्तु प्रवेशः सशुल्कः !''

※ ※ ※

ते न जानन्ति

विस्मरणशीलः प्राध्यापकः स्वमित्रं पृष्टवान् - ''अहं किं विस्मरणशीलः ?''

मित्रेण उक्तम् - ''न । सर्वथा न ।''

प्राध्यापकः पुनः पृष्टवान् - ''किन्तु केचन मया पृष्टस्य एतस्य एव प्रश्नस्य उत्तररूपेण 'आम्' इति वदन्ति किल, किमर्थम् ?''

''ते न जानन्ति यत् भवान् सर्वदा एतम् एव प्रश्नं पृच्छति इति ।''

※ ※ ※

हानिः वर्धिष्यते

'बसप्रयाणमूल्यं वर्धितम्' इति श्रुत्वा धर्मेशः उक्तवान् - ''एतेन सर्वकारस्य हानिः वर्धिष्यते'' इति ।

''कथम् एतत् ?'' इति आश्चर्येण पृष्टवान् सत्येशः ।

''पश्यतु भोः । मम कार्यालयं प्रति गमनार्थं पूर्वं रूप्यकद्वयं दातव्यम् । ततः...''

"ततः हानिवृद्धिः कथम् ?..."

"मादृशाः बहवः चिटिकाम् अस्वीकृत्य एव प्रयाणं कुर्वन्ति । अस्माकं चिटिका-अस्वीकरणात् पूर्वं रूप्यकद्वयमिता हानिः भवति स्म सर्वकारस्य । इदानीं तु अर्धरूप्यकमिता हानिः अधिका जाता ।"

※ ※ ※

सद्यः अधिकारिपदम् अलङ्कृतवान् कश्चन तरुणः अधिकारी कार्यालयीयान् उद्योगिनः मेलयित्वा उक्तवान् - "वयं जनैः सह प्रीत्या व्यवहरेम । श्रद्धया कार्यं कुर्याम ।"

एतत् श्रुत्वा उद्योगिनः उक्तवन्तः - "बहु उत्तमं वचनम् एतत् । फलके एतत् लेखयित्वा भित्तौ स्थापयिष्यामः वयम् ।"

"अस्माभिः समये उपस्थातव्यम् । सदा आसने स्थातव्यम् । तत्तद्दिनस्य कार्यं तत्तद्दिने एव समापनीयम्" - अधिकारी पुनः उक्तवान् ।

"एतत् वयम् अंशतः अनुसरन्तः स्मः एव । क्वचिदेव विलम्बः भवति अस्माकम् । वयम् आसने तिष्ठामः एव । क्वचित् यदा बहिः गच्छामः तदा अस्मदीयं प्रावारकम् (कोट्) अस्मदुपस्थितिं प्रमाणीकरोति । कानिचन कार्याणि तु तत्तद्दिने समाप्यन्ते एव" - इति उक्तवन्तः उद्योगिनः ।

"वयं यावत् वेतनं प्राप्नुमः ततोऽपि अधिकवेतनम् अन्यकार्यालयीयाः प्राप्नुवन्ति । अतः वेतनवृद्ध्यर्थम् अस्माकं संस्थायाः प्रमुखाः अनुरोधपूर्वकं प्रार्थनीयाः ।"

अधिकारिणः वचनस्य समाप्तेः अनुक्षणम् एव सर्वे उद्योगिनः उत्थाय एकस्वरेण उक्तवन्तः - "वेतनदाने पक्षपातः अक्षम्यः अपराधः । एतां प्रवृत्तिं विरुध्य वयं अद्य एव कर्मविरामान्दोलने (स्ट्रैक्) करिष्यामः । यावत् वेतनवृद्धिः न भविष्यति तावत् वयं कार्यं न करिष्यामः एव ।"

※ ※ ※

पुष्पचोरः

''आर्ये, पार्श्वगृहस्य बालकः रमेशः आ सप्ताहात् उषसि आगत्य भवत्याः गृहस्य पुष्पाणि चोरयति'' इति उक्तवान् दिनेशः ।

''वत्स ! एतत् कथं जानाति भवान् ?'' इति कुतूहलेन पृष्टवती प्रतिवेशिनी ।

''यतः अहं प्रतिदिनं तस्मिन् एव समये भवत्याः गृहस्य पुष्पाणि अविचिन्त्य नयामि ।''

※ ※ ※

सम्पादनीयानि कौशलानि

किं भोः, भवान् सर्वदा असत्यानि एव वदन् भवति इति वदति खलु भवतः माता ? किम् एतत् सत्यम् ?'' - इति पुत्रं पृष्टवान् राजकीयपुरुषः ।

''.......'' शिरः अवनमय्य मौनेन स्थितवान् पुत्रः ।

तदा राजकीयपुरुषः पुत्रं बोधितवान् - ''तरुणस्य भवतः एतत् न युज्यते । मम उत्तराधिकारिता प्राप्तव्या चेत् अचिरात् एव अन्यानि अपि कौशलानि सम्पादनीयानि भवता ।''

※ ※ ※

नास्ति वचनभङ्गः

आपणस्य पुरतः फलके लिखितम् आसीत् - ''अत्र तण्डुले पाषाणखण्डाः न भवन्ति'' इति ।

किलोपरिमितं तण्डुलं क्रीत्वा गृहं गतः श्रीरामः अर्धघण्टाभ्यन्तरे प्रत्यागत्य आपणिकं तर्जयन् उक्तवान् - ''पुरतः स्थितस्य फलकस्य, अत्र उपलभ्यमानस्य वस्तुनः च सङ्गतिः एव नास्ति खलु । पश्यतु तावत् अत्र । तण्डुलः पाषाणमयः ।''

''भवतु, किं तेन ?'' - शान्तस्वरेण पृष्टवान् आपणिकः ।

''तण्डुलस्य अर्धाधिकभागः पाषाणखण्डमयः ।''



''एवं तर्हि पाषाणखण्डेषु तण्डुलाः सन्ति । तण्डुले पाषाणखण्डाः न भवन्ति इत्यस्य वचनस्य भङ्गः तु न जातः एव ।''

द्वितीयः प्रश्नः

कस्यचित् अधिवक्तुः गृहद्वारे एवं फलकं लिखितम् आसीत् - 'शुल्कम् - प्रश्नद्वयस्य कृते शतं रूप्यकाणि' इति ।

तद् दृष्ट्वा कश्चन आगन्तुकः समीपं गत्वा द्वारघण्टां वादितवान् । द्वारम् उद्घाटितम् । आगन्तुकः द्वारोद्घाटकं पृष्टवान् - ''किम् अत्र एकस्य प्रश्नस्य कृते पञ्चाशत् रूप्यकाणि स्वीक्रियन्ते ?'' इति ।

''आम् । इदानीं वदतु । कः भवदीयः द्वितीयः प्रश्नः.... ?'' - उक्तवान् सः अधिवक्ता !

- डा० अञ्जुबाला, दिल्ली

गुरुः – 'सिंहस्य गुहायाः अन्तः गत्वा जीवितः सन् प्रत्यागन्तुं कः शक्नोति ?

'सिंहः !!' इति उत्तरम् उक्तवान् छात्रः ।

※ ※ ※



गुरुः – 'सिंहाद् अपि न बिभेति, तादृशं सत्त्वं किम् ?

शिष्यः – 'सिंहस्य धर्मपत्नी सिंही !

गुरुः – ननु भल्लूकानां शरीरे किमिति एतावन्ति रोमाणि विद्यन्ते ?

शिष्यः – भोः ! इयत् अपि न जानासि यत् वने नापिताः केशकर्तनकार्यालयाः वा न भवन्ति ?

※ ※ ※

गुरुः - 'रेल्यानेषु स्त्रीणां कृते किमर्थं भिन्नः कक्षः स्थाप्यते ?'
शिष्यः - 'पुरुषाणां शान्त्यर्थम् ।'

न्यायालये

न्यायाधीशः - भोः ! त्वम् अस्य दन्तद्वयं किमितित्रोटितवान् ?
अपराधी - यतः अस्य मुखे तावन्तः एव दन्ताः आसन् !

चिकित्सालये

रुग्णः - 'वैद्यवर्य ! मम बहु भयं भवति । इयं मम प्रथमा एव शस्त्रक्रिया ।
वैद्यः - न अत्र भयस्य कारणं किमपि, यतः मम अपि इयं प्रथमा एव शस्त्रक्रिया !!'

- मुनिकल्याणकीर्तिविजयः

महाकलियुगम्

प्रथमः युवकः - (पुरतः उपविष्टं युवकं प्रति) महाकलियुगम् आगतम् । एषः कालः वञ्चकानाम् एव । अधुना कुत्रापि यात्राकरणं महत्कष्टकरम् ? यदा अहं रेलयात्रां कृतवान्, तदा मम यानपेटिका लुप्ता । कोऽपि चोरितवान् ।
द्वितीयः - बहुमूल्यम् आसीत् किम् ?
प्रथमः - आम् ।
द्वितीयः - भवतः यानपेटिकायां किम् आसीत् ?
प्रथमः - तत्तु अहं न जानामि ।
द्वितीयः - भवान् किमर्थं न जानाति ?
प्रथमः - अहं तु अन्यस्मात् यानात् यानपेटिकाम् आनीतवान् । यः क्रीतवान् सः एव जानीयात् ।
द्वितीयः - सत्यमेव एतत्, महाकलियुगम् अस्ति ।

- विजयकुमारः

नप्ता दास्यति

कश्चित् कृपणः श्रेष्ठी नगरे अटन् आसीत्। मार्गे तस्य दृष्टिः कस्मिंश्चित् स्वल्पाहारगृहे न्यपतत्। तत्र एकं फलकं स्थापितम् आसीत्। फलके एवं लिखितम् आसीत् - 'आगच्छतु, यथेष्टं खादतु। देयकं भवता दातव्यं नास्ति। तच्च नप्ता दास्यति' इति।



तत् पठित्वा अतीव आनन्दितः श्रेष्ठी अन्तः प्रविष्टवान्। यथेष्टं स्वादु अन्नं मिष्टान्नं पयोहिमं च खादितवान्। प्रसन्नचित्तः भूत्वा उदरोपरि हस्तं प्रसारयन् स्वल्पाहारगृहात् बहिः गन्तुम् उद्युक्तः। अकस्मात् स्वल्पाहारगृहस्य सेवकः मार्गम् अवरुध्य चिटिकामेकां दत्तवान्। तस्मिन् लिखितम् आसीत् - '२०० रूप्यकाणि दातव्यानि' इति।

क्षणार्धेन कृपणस्य मुखमुद्रा विकृता जाता। क्रोधाविष्टः सः भ्रुकुटिम् आबध्य उक्तवान् - "किमर्थं मया दातव्यम्? 'भवता दातव्यं नास्ति' इति बहिः फलकम् अस्ति खलु!" इति।

स्वल्पाहारगृहस्य स्वामी समीपम् आगत्य उक्तवान् - "सत्यं महाशय!

परन्तु एतत् देयकम् अस्ति भवतः पितामहस्य । एवं भवता अद्य यत् खादितं तस्य धनराशिः तु भवता दातव्यः नास्ति । तं भवतः नप्ता एव दास्यति'' इति ।

कृपणः किंकर्तव्यतामूढः सन् २०० रूप्यकाणि दत्त्वा ततः निर्गतवान् ।

- गौरी, रायपुर

नष्टपूरणम्

पत्रिकाग्राहकः सम्पादकाय पत्रं विलिख्य सूचितवान् - 'गतषण्मासेभ्यः मह्यं प्रेष्यमाणायाः पत्रिकायाः उपरि सङ्केते 'त्रिवेदी' इति लेखनीये 'द्विवेदी' इति लिखितम् अस्ति । मम एकः वेदः नष्टः अभवत् । एतत् नष्टं मया न सह्यते' इति ।

अग्रिममासे तेन प्राप्तायां पत्रिकायां 'त्रिवेदी' इति लेखनीये 'चतुर्वेदी' इति लिखितम् आसीत् । पत्रिकाकार्यालयतः एकं पत्रमपि प्राप्तम् । तत्र लिखितम् आसीत् - 'षण्मासपर्यन्तं भवन्तं द्विवेदिनं कृतवन्तः यत् तदर्थं विषीदामः । इतःपरम् अग्रिमषण्मासान् यावत् 'त्रिवेदी' इति स्थाने 'चतुर्वेदी' इति लेखनेन भवदीयं नष्टं पूरयिष्यामः !'

- बालकृष्ण मन्तिगेमने

नरकस्य विज्ञापनम्

कश्चन मनुष्यः मरणं प्राप्तवान् । तदा यमदूतः तं पृष्टवान् - ''भवान् आदौ स्वर्गं गन्तुम् इच्छति, उत नरकम्?'' इति ।

सः मनुष्यः उक्तवान् - ''अहं प्रथमं स्वर्गं नरकं चापि सकृत् दृष्ट्वा एव गमनस्य निश्चयं करोमि'' इति ।

यमदूतः उक्तवान् - ''अस्तु ।'' ततः सः तं मनुष्यं वातायनात् स्वर्गं दर्शितवान् । तत्र पुष्पिताः वृक्षाः, प्रसन्नं वातावरणं च आसीत् । देवदेवताः परस्परम् आनन्देन वार्तालापं कुर्वन्ति स्म । अमृतं पिबन्ति स्म च ।

अनन्तरं यमदूतः तं मनुष्यं नरकं वातायनात् दर्शितवान् । तत्र तु चित्रपटनायिकाः नृत्यन्ति स्म, जनाः यथेष्टं मद्यपानं कुर्वन्ति स्म ।

स्वर्गं नरकं च एवं दृष्ट्वा सः मनुष्यः आदौ नरकगमनस्य एव निश्चयं कृतवान् । अतः तं मनुष्यं यमदूतः नरकं प्रेषितवान् ।



परन्तु तत्र सः दृष्टवान् यत् कश्चन नरकाधिकारी अन्यमनुष्यान् निर्दयं ताडयति स्म । अतः सः मनुष्यः नरकाधिकारिणं पृष्टवान् - ''यदा अहं वातायनात् दृष्टवान् तदा अन्यदेव चित्रमासीत् । इदानीं प्रत्यक्षनरके अन्यत् एव प्रचलति । किम् एतत् ?'' इति ।


नरकाधिकारी विहस्य उक्तवान् - ''मूर्ख ! तत् आसीत् नरकस्य विज्ञापिकामात्रम् !''

- वासन्ती

गायन्ती चटका

कस्यचित् वृक्षस्य शाखायाम् उपविश्य एका चटका गायन्ती आसीत् । किञ्चित्कालान्तरं सा उत्थाय स्वमुखं विरुद्धदिशायां परिवर्त्य उपविश्य अन्यत् गीतं गातुम् आरभत ।

तदा अन्या चटका ताम् अपृच्छत् - ''किं भोः, किमर्थम् एवं मुखं परिवर्त्य उपविश्य गायति ?'' इति ।



एषा चटका अवदत् - ''एतावत्पर्यन्तं 'अ'भागस्य (A- side) गीतानि गीतानि । इदानीं 'ब'भागस्य (B- side) गीतानि श्रावयामि'' इति ।

- डा॰ अञ्जुबाला, दिल्ली

चर्वितचर्वणम्

कश्चन कविः किमपि चर्वन् काव्यं लिखन् आसीत् । तदा तत्र आगतः तस्य वयस्यः पृष्टवान् - ''मित्र ! किं चर्वति भवान् ?''

''चर्वणकम् (च्यूयिङ्ग् गम्) । चर्वितचर्वणं कुर्वन् अस्मि अहम्'' - इति कविः उक्तवान् ।

तदा सः वयस्यः स्वगतम् उक्तवान् - ''यथा भोज्यं तथा काव्यम् ।''

- पु. ना. कृष्णन्, देहली

※ ※ ※

कारणं कण्डूतेः

एकदा एकः चञ्चलप्रवृत्तिकः पुरुषः पण्डितसमीपम् आगत्य वदति - ''मम हस्ते कण्डूतिः दृश्यते ।''

पण्डितः वदति - ''तर्हि धनलाभः भविष्यति ।''

''मम कर्णे अपि कण्डूतिः दृश्यते ।''

''एवं तर्हि कर्णाभरणलाभः भविष्यति ।''

''मम कण्ठे अपि कण्डूतिः दृश्यते ।''

तत् श्रुत्वा पण्डितः अल्पकोपमिश्रितेन स्वरेण उक्तवान् - ''भवान् त्वरया वैद्यं पश्यतु, यतः भवतः चर्मरोगः अस्ति ।''

- सुदर्शनशास्त्री, हरियाणा

※ ※ ※

व्यर्थं धावनम्

छात्रावासे वसन् कश्चन बालकः स्वपेटिकायाम् एकं राङ्कवं स्थापयित्वा तदुपरि एकां चिटिकां स्थापितवान् । तत्र लिखितम् आसीत् - ''एतत् केनापि न चोरणीयम् । यतः अहं मल्लविद्यानिपुणः अस्मि ।''

एकः चोरः आगत्य राङ्कवं चोरितवान् ।

चिटिकायां लिखितं पठितवान् अपि । सः अपि तत्र एकां चिटिकां

स्थापितवान् । तत्र लिखितम् आसीत् - ''मम अनुसरणं व्यर्थम् । यतः अहं धावननिपुणः अस्मि ।''

- अजयकुमारः, प्रयागः

※ ※ ※

विस्मरणशीलता

''मम पत्युः महती विस्मरणशीलता । 'आपणात् फलानि आनयतु' इति अहम् उक्तवती आसम् । स तु वस्त्राणि आनीतवान्'' - एका उक्तवती ।

तदा अपरा उक्तवती - ''मम पत्युः विस्मरणशीलता तु इतोऽपि घोरा । एकदा सः आपणे मां दृष्ट्वा उक्तवान् आसीत् - ''भगिनि, किं नाम भवत्याः ? भवती मया दृष्टपूर्वा इति भाति' इति ।''

- नन्दकिशोरशर्मा, कुरुक्षेत्रम्

※ ※ ※

वृष्टिकारणतः

अध्यापकः सर्वान् छात्रान् उद्दिश्य उक्तवान् - ''क्रीडास्पर्धाविषये सर्वेऽपि एकं प्रबन्धं लिखन्तु'' इति । सर्वे छात्राः लिखितवन्तः । किन्तु एकः छात्रः लिखन् न आसीत् । अध्यापकः तं पृष्टवान् - ''किं भोः, भवान् प्रबन्धं किमर्थं न लिखति ?''

तदा छात्रः शान्तस्वरेण उक्तवान् - ''श्रीमन् ! क्रीडास्पधा तु वृष्टिकारणतः स्थगिता अस्ति ।''

- नन्दकिशोरशर्मा, कुरुक्षेत्रम्

※ ※ ※

तदपि नास्ति

रात्रौ अतिवेगेन स्कूटर्यानं चालयन्तं कञ्चित् गृहीत्वा आरक्षकः उक्तवान् - ''तिष्ठतु रे तत्रैव ! दीपरहितं स्कूटर्यानं चालयति खलु भवान् ?''

तदा प्रस्थानत्वरां प्रदर्शयन् स्कूटर्चालकः उक्तवान् – ''आरक्षकवर्य ! अपसरतु इतः । मम यानस्य अवरोधिका सम्यक् नास्ति । चालनानुज्ञापत्रमपि नास्ति ।''

– जि. कृष्णन्, केनडा

कालज्ञानम्

गुरुः – (व्याकरणपाठानन्तरम्) 'कम्बलम् आच्छाद्य शयनं कृतवान् ।' एषः कः कालः ?

शिष्यः – शैत्यकालः ...!!

– बालकृष्ण हेगडे मन्तिगेमन

न अस्मदीयाः

ग्राहकः – कीदृशम् उपाहारमन्दिरम् इदं, सर्वत्र मक्षिकाः एव दृश्यन्ते !

स्वामी – न खलु एताः अस्मदीयाः । अपरस्मात् आगताः सन्ति !

– श्री रोहिणीकुमारः



मया वक्तुम् उद्युक्तम्....

पुत्रः - (भोजनसमये) तात, तात...!
पिता - मौनेन भोजनं करणीयम् । भोजनसमये सम्भाषणं न करणीयम् । तूष्णीं भोजनं करोतु ।



(भोजनानन्तरम्)
पिता - वत्स ..! इदानीं वदतु किं वक्तव्यम् आसीत् भवता इति...।
पुत्रः - अहं वक्तुम् उद्युक्तः आसं यत् भवतः भोजनपात्रे तैलपः पतितः आसीत् इति...!

विलम्बकारणम्

शिक्षकः - किमर्थम् एतावान् विलम्बः ?
छात्रः - समये आगतम् आसीत् मया । परन्तु विद्यालयसमीपे फलकं दृष्टं - 'विद्यालयपरिसरः शनैः चलतु' इति । अतः.....!

- बालकृष्ण हेगडे मन्तिगेमने

बालवाटिका

शिशुभिः गातुं योग्यानि ललितानि मनोहराणि च शिशुगीतानि सन्ति अत्र सचित्राणि। शिशूनां मुखात् गीयमानानि एतानि कस्य वा न जनयेयुः अमन्दम् आनन्दम्। शिशुसहजः कल्पनाविलासः, कविसुलभः उक्ति-विलासश्च सम्मिलितौ स्तः अत्रत्येषु शिशुगीतेषु।